२४

समाधिस्वरूपम्

प्रस्तावना

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। दुःखस्य आत्यन्तिकनिवृत्तिः परमानन्दप्राप्तिश्च मोक्षः। अयञ्च मोक्षः बद्धस्य जीवस्य स्वस्वरूपाज्ञाननाशाद् भवति। स्वस्वरूपाज्ञानस्य नाशश्च अखण्डाकारचित्तवृत्त्या सञ्जायते। अखण्डाकारचित्तवृत्तिश्च निदिध्यासनेन सम्भवति। श्रवणेन शास्त्रगुरुवाक्यादीनां ब्रह्मणि तात्पर्यं बुद्ध्वा, मननेन च ब्रह्मविषयकविरुद्धयुक्तीनां खण्डनं विधाय ब्रह्मविषये असन्दिग्धा अविपर्यस्ता च बुद्धिः भवति। तादृशब्रह्मणि मनसः स्थैर्यसम्पादनमेव निदिध्यासनम्। इदं निदिध्यासनम् एव ब्रह्मसाक्षात्कारे कारणम्, आम्नातं च – "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्" इति। अतो वेदान्ताचार्यैः निदिध्यासनम् महता यत्नेन प्रतिपादितम्। निदिध्यासनम् एव समाधिः। निदिध्यासनस्य आद्यावस्थायां सविकल्पकसमाधिः भवति, पक्वावस्थायां च निर्विकल्पकसमाधिः भवति। निर्विकल्पसमाधिरेव निदिध्यासनस्य परा काष्ठा। निर्विकल्पकसमाधौ सति अखण्डाकारा चित्तवृत्तिरुदेति। सा चित्तवृत्तिः जीवस्य स्वरूपविषयकमज्ञानं नाशयति स्वयमपि नश्यति। तेन च जीवः मुच्यते कर्मसंसारबन्धनात्। अतः अस्माभिरस्मिन् प्रबन्धे समाधेः स्वरूपम्, समाधेः आवश्यकता, समाधेः प्रकाराः इत्यादिविषये आलोचनं विधास्यते।

उद्देश्यानि

एतं पाठं पठित्वा अध्येतारः अधःस्थविषयान् ज्ञास्यन्ति –

- मोक्षस्य उपायाः के, किं च तेषां स्वरूपम्।
- निदिध्यासनस्य विशेषस्वरूपम्।
- निदिध्यासनसमाध्योरभेदः।
- समाधेरावश्यकता।
- समाधेः भेदद्वयम्।
- चित्तवृत्तेः अज्ञाननाशकत्वम्।
- अखण्डाकारचित्तवृत्तिस्वरूपम् अज्ञाननाशप्रकारश्च।
- ज्ञेयानां वृत्तिविषयत्वं फलविषयत्वं च।

२४.१) भूमिका

"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति अद्वैतवेदान्तसिद्धान्तः। ब्रह्म नित्यशुद्धबुद्धमुक्तस्वरूपम्। अन्तःकरणोपहितं ब्रह्म एव जीवः, अन्तःकरणरूपस्य उपाधेः नाशाद् एव जीवत्वनाशः। जीवत्वनाशे सति कर्तृत्व-भोक्तृत्वादिसमुपजनितं दुःखादीनामपि नाशः। अयम् आत्यन्तिकदुःखनाश एव मोक्षः। एवंविधस्य मोक्षस्य प्राप्तये केचन उपायाः उपनिषत्सु समुपनिबद्धाः। आम्नातं च बृहदारण्यकोपनिषदि – "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति। स्वस्वरूपाज्ञाननाशाय मुमुक्षुणा श्रवणं मननं निदिध्यासनं च समाचरणीयानि। तेषु श्रवणं नाम – "वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया" इति। सर्वाणि वेदान्तवाक्यानि अद्वैतं ब्रह्म एव प्रतिपादयन्ति इति तात्पर्यावधारणाय विहिता मानसक्रिया एव श्रवणम्। मननं च शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनकमानसव्यापारः इति। गुरुशास्त्रवाक्यानां ब्रह्मणि तात्पर्यं बुद्ध्वा ब्रह्मविषये समापतितानां विरोधियुक्तीनां खण्डनाय विहिता मानसी क्रिया तावत् मननम्। मननेन शास्त्रावधारिते अर्थे दृढा मतिर्भवति। श्रवणमननाभ्यां दृढनिश्चिते अर्थे तद्भिन्नविषयेभ्यः अपकृष्टस्य मनसः स्थैर्यमेव निदिध्यासनम्। उच्यते च वेदान्तपरिभाषायां – "निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकस्थैर्यानुकूलो मानसव्यापारः" इति। एवं श्रवण-मनन-निदिध्यासनानाम् अनुष्ठानेन मुक्तिः भवतीति वेदान्तिनां सिद्धान्तः। निदिध्यासनम् एव समाधिः। निदिध्यासन-समाध्योः स्वरूपविज्ञानं विना न हि तयोरैक्यम् अनैक्यं वा प्रतिपादयितुं शक्यते। अतः आदौ निदिध्यासनस्वरूपम् आलोच्यते।

२४.२) निदिध्यासनस्वरूपम्

निदिध्यासनस्वरूपविषये उच्यते वेदान्तसारे – "विजातीय-देहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्" इति। जाग्रदवस्थायां विविधविषयाणां ज्ञानमस्माकं भवति। अज्ञाननाशाद् एव ज्ञानं जायते। चित्तवृत्तिः अज्ञानं नाशयति। अतः ज्ञानस्थले अवश्यं चित्तवृत्तिः उत्पद्यते। तथाहि घटज्ञानादनन्तरं पटज्ञानं, पटज्ञानादनन्तरं दण्डज्ञानमेवं विविधज्ञानानाम् उत्पत्तेः जाग्रदवस्थायां चित्तवृत्तयोऽपि क्षणानन्तरमेव भिद्यन्ते। तेन चेतसः स्थिरता न सम्भवति। यदि एकस्य घटस्यैव निरन्तरं ज्ञानं भवेत् तदा निरन्तरं घटविषयिणी चित्तवृत्तिर्भवति, तेन च चित्तस्य स्थिरता सम्भवति। यदा निरन्तरम् एकजातीया एव चित्तवृत्तिर्भवति तदा चित्तं विविधविषयेषु न गच्छतीति हेतोः चित्तं स्थिरम् इति कथ्यते।

निदिध्यासनं हि मोक्षजनकम्। अतो न हि घटपटादिविषये निरन्तरचित्तवृत्तिप्रवाहः निदिध्यासनं भवति।"तमेव विदित्वातिमृत्युमेति", "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिषु ज्ञायते यद् उपनिषत्प्रतिपादितस्य ब्रह्मणः ज्ञानादेव मुक्तिर्भवति इति। अतः ब्रह्मविषयिणी निरन्तरचित्तवृत्तिरेव निदिध्यासनम्। सर्वैरेव इन्द्रियैः ब्रह्मणः ज्ञानं सम्भवति। यथा चक्षुषा अयं घटः अस्ति इति घटस्य ज्ञानं भवति। तस्मिन् ज्ञाने घटस्य सत्ता ज्ञायते। न हि घटज्ञानादनन्तरं कस्यचित् सन्देहो भवति – घटः अस्ति न वेति। सत्ता च ब्रह्मणः एव। ब्रह्मणि अखिलस्य प्रपञ्चस्य आरोपात् ब्रह्म अधिष्ठानम्, प्रपञ्चश्च

आरोप्यः। आरोपस्थले अधिष्ठानस्य अंशः आरोप्यज्ञाने भासते इत्येव नियमः। यथा शुक्तिरजतभ्रमस्थले इदं रजतमिति शुक्तौ विद्यमाना इदन्ता (सन्निकृष्टता) रजतज्ञाने रजताभेदेन ज्ञायते तथैव घटज्ञानस्थले ब्रह्मणः स्वरूपभूता सत्ता एव घटेन सह अभिन्नतया ज्ञायते। अतः चक्षुषा सत्ताग्रहणात् ब्रह्म ज्ञातमिति स्पष्टम्।

परन्तु एतेषु प्रापञ्चिकवस्तूनां ज्ञानस्थले न हि केवलम् अद्वितीयं ब्रह्म ज्ञायते, तद्विजातीयैः घटपटादिभिः सह तादात्म्येन ब्रह्म ज्ञातं भवति। एवं देहात्मबुद्धिस्थले देहेन सह अभेदेन आत्मा ज्ञायते। परन्तु विजातीयदेहघटादिभिः तादात्म्येन भासमानस्य ब्रह्मणः ज्ञानेन न मुक्तिः सम्भवति। तेभ्यः देहघटादिभ्यः पृथक्तया यदा अद्वितीयस्य ब्रह्मवस्तुनः ज्ञानं भवति तदा स्वस्वरूपज्ञानात् मोक्षो भवति। अतः न हि विजातीयवस्तुभिः तादात्म्येन भासमानस्य ब्रह्मणः विषये निरन्तरचित्तवृत्तिः निदिध्यासनम्, परन्तु विजातीयैः देहादिप्रत्ययैः रहितस्य अद्वितीयब्रह्मणः विषये निरन्तरं चित्तवृत्तिः भवति चेत् निदिध्यासनं सम्भवति। अतो देहादिभिः भेदेन विद्यमानस्य अद्वैतब्रह्मणः विषये निरन्तरं चित्तवृत्तिरेव निदिध्यासनम् इति वेदान्तसारकर्तुः सदानन्दयतेः अभिप्राय इति स्पष्टम्। आत्मविषयकस्थैर्यानुकूलः मानसः व्यापार एव निदिध्यासनम् इति वेदान्तपरिभाषाकारः ख्यापितवान्। वेदान्तपरिभाषाकारेण प्रतिपादितस्य अर्थस्य एव विस्तारः वेदान्तसारे परिदृश्यते। विद्यारण्यस्वामी पञ्चदशीग्रन्थे निदिध्यासनलक्षणं श्लोकेनाह –

"ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।

एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥" इति।

श्रवणमननाभ्याम् अवधारिते निःसन्दिग्धे ब्रह्मविषये स्थापितस्य चित्तस्य यदेकतानत्वम् एकाकारवृत्तिप्रवाहः तदेव निदिध्यासनम् इति श्लोकार्थः। निदिध्यासनं च यावद्ब्रह्मज्ञानं न भवति तावदनुष्ठेयम्। एवं यावत्कालपर्यन्तं ब्रह्मणि श्रुतीनां तात्पर्यावधारणं न भवेत् तावत्कालपर्यन्तं श्रवणं, यावच्च ब्रह्मणि असन्दिग्धा अविपर्यस्ता च बुद्धिः नोदीयात् तावत् मननं कर्तव्यम्। न हि **"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"** इत्यादिश्रुतिषु सकृच्छ्रवणं सकृत् मननं सकृत् निदिध्यासनं वा उपदिश्यते। एतादृशीनां श्रुतीनां नैकवारं दर्शनादेव इदं स्पष्टं भवति यत् श्रवण-मनन-निदिध्यासनादीनां ब्रह्मसाक्षात्कारं यावत् आवृत्तिः उपदिश्यते इति। यथा अवहननेन धान्येभ्यः तण्डूलाः संग्रहणीयाः चेत् यावत् तण्डूलानां निष्कासनं न भवति तावद् अवहननं विधीयते तथैव प्रकृतेऽपि यावन्न ब्रह्मज्ञानं भवति तावत् श्रवणादीनाम् आवृत्तिः विधातव्येति स्पष्टम्। उक्तं च तस्माद् भगवता बादरायणेन – 'आवृत्तिरसकृदुपदेशात्' इति।

पाठगतप्रश्नाः १

१. कः परमपुरुषार्थः?

२. को नाम मोक्षः?

३. के मोक्षोपायाः?

४. अखण्डाकारचित्तवृत्तेः किं कार्यम्?

५. जीवस्य उपाधिः कः?

६. मोक्षसाधननिर्देशिका श्रुतिः का?

७. किं तावत् श्रवणम्?

८. किं नाम मननम्?

९. निदिध्यासनं नाम किम्?

१०. चित्तवृत्तिः किं करोति?

११. लौकिकज्ञानस्थले कथं ब्रह्म ज्ञायते?

१२. श्रवणादीनाम् आवृत्तिः कतिवारं विधेयम्?

२४.३) समाधेः आवश्यकताविचारः

इदानीम् अयं प्रश्नः सुतरामुदेति यत् श्रवणमननाभ्याम् अनन्तरं निदिध्यासनस्य कथनात्, निदिध्यासनस्यैव ब्रह्मज्ञानं यावत् विधानात् कुत्र समाधेः अवसरः इति? यदि च निदिध्यासनाद् भेदेन समाधेः उपन्यासो भवति तर्हि द्रष्टव्यादिश्रुतेः अपलापः स्यात्। अत्रोच्यते, न हि समाधिः निदिध्यासनाद् व्यतिरिक्तः, येन श्रुतिविरोधः स्यात्। निदिध्यासनमेव समाधिः। अतः वेदान्तसारे निदिध्यासनस्वरूपकथनाद् अनन्तरमेव समाधिस्वरूपम् अकथयित्वा साक्षात् समाधिः द्विविध इति कथ्यते। निदिध्यासनमेव यदि समाधिः न स्यात् तर्हि निदिध्यासनात् परं सङ्गतिनिर्देशं विना साक्षात् समाधेः आलोचनम् अप्रासङ्गिकोपन्यास एव स्यात्। परन्तु निदिध्यासनसमाध्योः भेदाभावात् न तत्र अप्रासङ्गिकः उपन्यास आशङ्कनीयः।

विद्यारण्यस्वामिनस्तु निदिध्यासनलक्षणम् उक्त्वा ततो भिन्नतया समाधेः लक्षणमाहुः। तथाहि समाधिलक्षणं तेनैवं विधीयते –

"ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।

निवातदीपवच्चितं समाधिरभिधीयते॥" इति।

श्लोकार्थो हि – ध्यातारं ध्यानं च परित्यज्य यदा चित्तं ध्येयगतमेव भवति, ध्येये च निरवच्छिन्नतया निवातदीवत् तिष्ठति, सा स्थितिः समाधिः इत्युच्यते। अत्र समाधिपदेन निर्विकल्पकसमाधिः एव उपदिष्टः। शङ्कराचार्या अपि विवेकचूडामणौ निदिध्यासनाद् भेदेन समाधिमाहुः। उच्यते च विवेकचूडामणौ –

"श्रुतेः शतगुणं विद्यान्मननं मननादपि।

निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥" इति।

अत्रायं श्लोकार्थः – श्रुतेः शतगुणं गुरुत्वावहं भवति मननं, मननाद् लक्षगुणं गुरुत्वावहं भवति निदिध्यासनं, अनन्तं गुरुत्वावहः च निर्विकल्पकसमाधिः इति। किञ्च, निर्विकल्पकसमाधिः एव मोक्षं प्रति कारणमिति भगवता शङ्कराचार्येण प्रतिपाद्यते-

"अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा।

समाधिनाऽविकल्पेन तदाद्वैतात्मदर्शनम्॥" इति।

अत्रार्थो हि – यदा निर्विकल्पकसमाधिना अद्वैतस्य आत्मनः ज्ञानं भवति तदा एव अज्ञानरूपहृदयग्रन्थीनां निःशेषं विलयो भवति इति।

इदानीं विद्यारण्यवाक्यात् शाङ्करवाक्यात् च इदम् आयातं यत् समाधिः नाम निर्विकल्पकसमाधिः, अस्य समाधेरुदये च अज्ञाननाशात् मुक्तिः सम्भवति इति। "निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते" इत्यादिविवेकचूडामणिवचनाच्च इदं ज्ञायते यत् अत्र निदिध्यासनपदेन साधारणतया सविकल्पकसमाधिः एव समुपदिश्यते। ननु निदिध्यासनसमाध्योः यदि अभेदः तर्हि कथं तयोः निदिध्यासनपदेनैव उपदेशः विद्यारण्यैः शङ्कराचार्यैः वा न विधीयते इति चेदुच्यते समाधिस्तु निदिध्यासनविशेषः। विशेषं सामान्यात् अतिरिच्यते, अतः निर्विकल्पसमाधेः गोबलीवर्दन्यायेन वशिष्ठब्राह्मणन्यायेन वा पृथक्तया उपदेशो विहितः। निदिध्यासनस्य पक्वावस्था हि निर्विकल्पसमाधिः। उच्यते च पञ्चदशीटीकाकारेण रामकृष्णेन – "तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधिमाह" इति। आम्रं पक्वं भवति चेत् यथा न तत् पनसमिति कथ्यते तथैव निदिध्यासनस्य पक्वावस्था अपि निदिध्यासनान्तर्गता एव। अतो समाधिना ब्रह्मलाभे न श्रुतिविरोधः, ब्रह्मज्ञानं यावत् निदिध्यासनस्य आवृत्तिविधानात्।

यतः निर्विकल्पसमाधेरेव अज्ञाननाशः प्रतिपाद्यते, अतः निर्विकल्पसमाधेः तत्र च द्वारभूतस्य सविकल्पसमाधेः स्वरूपं सुतरामालोचनीयम्।

२४.४) समाधिद्वैविध्यम्

समाधिः द्विविधः सविकल्पकः निर्विकल्पकश्च। उभयविधसाधारणं समाधिलक्षणं तावदुच्यते वेदान्तसारटीकायां सुबोधिन्यां नृसिंहसरस्वतीस्वामिभिः – "व्युत्थान-निरोधसंस्कारयोः अभिभवप्रादुर्भावे सति चित्तस्य एकाग्रतापरिणामः समाधिः" इति। चित्तस्य हि धर्मद्वयम् – प्रत्ययः संस्कारश्च। प्रत्ययरूपेण चित्तस्य उत्थानमेव व्युत्थानम्, तच्च प्रत्ययात्मकम्। चित्तस्य निरुद्धावस्थां व्यतिरिच्य क्षिप्त-मूढ-विक्षिप्तैकाग्र्यावस्थाः व्युत्थानरूपा एव। ऐकाग्र्यावस्थायां जायमानः सविकल्पकोऽपि निर्विकल्पकदृष्ट्या व्युत्थानरूप एव। तस्य व्युत्थानस्य संस्कारा हि व्युत्थानसंस्काराः। चित्तस्य निरोधस्य अभ्यासेन जायमानः संस्कारः निरोधसंस्कारः। व्युत्थानसंस्कारस्य हि निरोधसंस्कारेण अभिभवः, न हि प्रत्ययेन संस्कारस्य अभिभवः सम्भवति। एवं चित्तस्य व्युत्थानसंस्कारस्य अभिभवे निरोधसंस्कारस्य प्रादुर्भावे च सति चित्तस्य या एकाग्रतया स्थितिः, सा एव समाधिः। एवं चित्तस्य ज्ञेयात्मना निश्चलावस्थानं समाधिरिति तात्पर्यं रामतीर्थाचार्यस्य अभिप्रेतम्।

सविकल्पकः समाधिरेव योगप्रोक्तः सम्प्रज्ञातसमाधिः, निर्विकल्पकश्च असम्प्रज्ञातसमाधिः। परन्तु योगप्रोक्तस्य असम्प्रज्ञातसमाधेः वेदान्तप्रतिपादितस्य निर्विकल्पकसमाधेश्च सन्ति भेदाः। ते चाग्रे आलोचयिष्यन्ते। इदानीं सविकल्पक-निर्विकल्पकसमाध्योः स्वरूपमालोच्यते।

पाठगतप्रश्नाः २

१३. विद्यारण्यस्वामिना समाधिलक्षणं किं विहितम्?

१४. व्युत्थानावस्था नाम का?

१५. व्युत्थानसंस्कारस्य अभिभवः कथं भवति?

१६. सविकल्पकसमाधेः योगदर्शने किं नाम?

१७. समाधिः कतिविधः, कौ च तौ?

२४.५) सविकल्पकः समाधिः

विकल्पो नाम भेदः। यत्र समाधौ विकल्पभाने सत्यपि चित्तं ज्ञेयब्रह्मविषये एकाग्रं भवति सः सविकल्पकः समाधिः। अयं घटः इति घटज्ञानम्। अत्र ज्ञाने घटः ज्ञेयः। अहं हि ज्ञाता। एवं ज्ञानस्थले एतत् पुटत्रयं सुतरां तिष्ठति। सविकल्पकसमाधौ एषा त्रिपुटी विद्यते, ज्ञेयाकारा निरवच्छिन्नचित्तवृत्तयश्च भवन्ति। उच्यते च वेदान्तसारे सविकल्पकसमाधिविषये – "तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्" इति। तदा मृन्मयगजादिभाने अपि मृद्भानवत् द्वैतभाने अपि अद्वैतं वस्तु भासते" इति। यत्र समाधौ ज्ञातृज्ञानज्ञेयरूपविकल्पाः भासन्ते, न तेषां लयो भवति, किञ्च, अद्वितीयब्रह्मविषयिणी निरवच्छिन्ना चित्तवृत्तिरुदेति स सविकल्पकः समाधिः।

ननु समाधिस्तावत् सकलभेदनिरासपूर्वकम् अद्वैतब्रह्मवस्तुसाक्षात्काराय प्रवर्तितः, परन्तु सविकल्पकसमाधौ ज्ञातृज्ञानादिभेददर्शनात् कथम् अद्वैतं ब्रह्मवस्तु भासेत इति चेदुच्यते, सविकल्पकसमाधौ ज्ञातृज्ञानभेदस्य ज्ञाने सत्यपि अद्वैतं ब्रह्म भासते। यथा सुवर्णकुण्डलादिज्ञाने सति तदुपादानस्य सुवर्णस्य ज्ञानं भवति, यथा वा मृन्मयगजादिज्ञाने सति तदुपादानभूताया मृत्तिकाया ज्ञानं भवति तथैव ज्ञातृ-ज्ञानादीनाम् ब्रह्मविवर्तत्वात् वाचारम्भणमात्रत्वात् ज्ञातृज्ञानादिभाने सति अपि अद्वैतं ब्रह्मवस्तु एव भासते। "सर्वं खल्विदं ब्रह्म", "ऐतदात्म्यमिदं सर्वम्" – इत्यादिश्रुतेः सर्वेषु विषयेषु आत्मानुभवे सति दग्धपटन्यायेन प्रपञ्चभाने सत्यपि अद्वैतं वस्तु भासते। उच्यते च शङ्कराचार्येण उपदेशसाहस्र्यां -

"दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।

अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तमोम्॥" इति।

अस्यार्थो हि – द्रष्टृस्वरूपं, गगनेन तुल्यं, श्रेष्ठम्, एकरूपेण प्रकाशमानम्, जन्मरहितम्, सकलोपाधिशून्यं, कूटस्थम्, असङ्गं, सर्वव्यापि, सदा विमुक्तं च यत् अद्वयं वस्तु तद् अहमेवेति। उच्यते च श्रीमद्भगवद्गीतायाम् -

"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।" इति च।

सविकल्पकसमाधौ त्रिपुटी विद्यते, अद्वैतब्रह्माकाराकारिता चित्तवृत्तिश्च विद्यते। अयमेव समाधिः योगशास्त्रे सम्प्रज्ञातसमाधिः इत्युच्यते। सम्प्रज्ञायते अस्मिन् ज्ञेयतत्त्वम् इति सम्प्रज्ञातः। अस्मिन् समाधौ ज्ञेयतत्त्वं सम्यक् बुद्ध्यारूढं भवति, तस्मादेवम् अभिधानम्।

२४.६) निर्विकल्पकः समाधिः

सर्वविकल्पलये सति ज्ञेयाकारा चित्तवृत्तिः यदा भवति सा हि निर्विकल्पकः समाधिरित्युच्यते। उच्यते च वेदान्तसारे सदानन्दयोगीन्द्रेण – "निर्विकल्पकः तु ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अतितराम् एकीभावेन अवस्थानम्" इति। अस्मिन् समाधौ ज्ञातृज्ञानज्ञेयादिभेदबुद्धेः लयो भवति, अखण्डाकाराकारिता चित्तवृत्तिश्च अवतिष्ठते। निर्विकल्पकसमाधौ चित्तवृत्तिसत्त्वेऽपि तस्य अवभासो न भवति, अद्वितीयब्रह्मवस्तुमात्रम् अवभासते। यथा लवणजलयोः मिश्रणे सति न तयोः भेदो गृह्यते जलमात्रं गृहीतं भवति, तथैव निर्विकल्पकसमाधौ अद्वितीयब्रह्माकाराकारितायाः चित्तवृत्तेः अवभासो न भवति, केवलम् अद्वितीयं ब्रह्म एव अवभासते।

योगदर्शने प्रतिपादितात् असम्प्रज्ञातसमाधेः निर्विकल्पकसमाधेरस्ति किञ्चिद्वैलक्षण्यम्। तथाहि, असम्प्रज्ञातसमाधौ चित्तवृत्तयः तिरोभवन्ति, संस्कारमात्रम् अवशिष्यते। निर्विकल्पकसमाधौ तु न हि सर्वासां चित्तवृत्तीनां तिरोभावो भवति, अखण्डाकारा ब्रह्मविषयिणी चित्तवृत्तिरज्ञायमाना सती अवतिष्ठते इत्यनयोर्भेदः। उच्यते च पञ्चदशीकारेण विद्यारण्यस्वामिना –

"वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः।
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्॥" इति।

'एतावन्तं कालं समाहितोऽभूवम्' इत्यादि-समाहितोत्थित-परामशात् समाधौ अज्ञाततया वृत्तिसद्भावः अनुमीयते।

निर्विकल्पकसमाधेः सुषुप्तिमूर्च्छादीनाञ्च अस्ति भेदः। सुषुप्तौ अपि चित्तवृत्तेः अभानं भवति, समाधौ अपि तथा, परन्तु सुषुप्तौ न हि चित्तवृत्तिः विद्यते। निर्विकल्पकसमाधौ तु चित्तवृत्तिर्वर्तते परन्तु तस्याः भानं न भवति इति समाधिसुषुप्त्योर्भेदः। उच्यते च वेदान्तसारे –

"ततश्च तस्य सुषुप्तेश्च अभेदशङ्का न भवति, उभयत्र वृत्त्यभाने समाने अपि तत्सद्भावासद्भावमात्रेण अनयोः भेदोपपत्तेः" इति।

पाठगतप्रश्नाः ३

१८. समाधेः साधारणं लक्षणं किम्?

१९. त्रिपुटी नाम का?

२०. सविकल्पकसमाधिः कः?

२१. विकल्पभानेऽपि कथं सविकल्पकसमाधौ अद्वैतं ब्रह्म भासते?

२२. ब्रह्मणः सर्वात्मकत्वद्योतिकाः श्रुतयः काः?

२३. कदा निर्विकल्पकः समाधिः भवति?

२४. वेदान्तसारे निर्विकल्पकसमाधेः स्वरूपविषये किमुक्तम्?

२५. निर्विकल्पकसमाधौ चित्तवृत्तिस्तिष्ठति न वा?

२६. निर्विकल्पकसमाधेः असम्प्रज्ञातसमाधेश्च को भेदः?

२७. निर्विकल्पकसमाधेः सुषुप्तेश्च को भेदः?

२८. समाधौ वृत्तेः स्थितिविषये विद्यारण्यस्वामिना किमुक्तम्?

२४.७) अखण्डाकारचित्तवृत्तिः अज्ञाननाशश्च

शुद्धं ब्रह्म न हि अज्ञानं नाशयति। चित्तवृत्त्युपहितं चैतन्यमेव अज्ञानं नाशयति। चित्तवृत्तिर्नाम चित्तस्य विषयाकारः परिणामः। तथाहि घटज्ञानस्थले चक्षुरिन्द्रियेण सह घटस्य सम्बन्धो भवति। तदा चक्षुरिन्द्रियद्वारा मनः घटेन सह संयुनक्ति। तेन च मनः घटाकारेण परिणमते। मनसः अयं परिणाम एव वृत्तिरित्युच्यते। यथा तडागात् जलं कुल्याद्वारा केदारान् प्रविशति, केदारान् प्रविश्य च केदाराकारं धत्ते, तथैव मनः चक्षुरिन्द्रियद्वारा विषयदेशं गच्छति विषयाकारं च धत्ते। यस्मिन् विषये चित्तवृत्तिर्भवति तद्विषयकम् अज्ञानं नश्यति। तथाहि यदि घटाकारा चित्तवृत्तिर्भवति तर्हि घटविषयकम् अज्ञानं नश्यति घटश्च प्रकाशते, यदा च पटाकारा चित्तवृत्तिर्भवति तदा पटविषयकम् अज्ञानं नश्यति पटश्च प्रकाशितो भवति। येषां च वस्तूनाम् आकारो नास्ति तेषु विषयेषु संलग्नस्य चित्तस्य कथं तदाकारता स्यादिति प्रश्नश्चेत् उच्यते यत् या अन्तःकरणवृत्तिः यद्विषयकमज्ञानं नाशयति सा अन्तःकरणवृत्तिः तदाकारा इति बोध्यम्। तथाहि या अन्तःकरणवृत्तिः घटविषयकम् अज्ञानं नाशयति सा घटाकारा, या अन्तःकरणवृत्तिः पटविषयकम् अज्ञानं नाशयति सा पटाकारा, एवमन्यत्रापि ऊहनीयम्। तडागकेदारादि उदाहरणं तु बालबोधाय।

घटादयः ब्रह्मणि अध्यस्ताः। न हि घटे अज्ञानं तिष्ठति। घटो हि अज्ञानकार्यम्, अज्ञानमेव तत्। अज्ञानं तु सर्वदा ब्रह्मणि एव तिष्ठति। घटः ब्रह्मणि अध्यस्तः, घटावच्छिन्ने ब्रह्मणि हि अज्ञानं वर्तते। घटो न प्रकाशते इति उच्यते चेत् घटावच्छिन्ने चैतन्ये अज्ञानं वर्तते इति प्रतीयते। तस्य च अज्ञानस्य विषयो भवति घटः। घटाकारा अन्तःकरणवृत्तिः तावत् घटावच्छिन्ने ब्रह्मणि विद्यमानम् अज्ञानं नाशयति। अज्ञानावरणस्य नाशात् घटावच्छिन्नं चैतन्यं प्रकाशितं भवति। चैतन्यं हि प्रकाशस्वरूपं, सदा

प्रकाशमानम्। यथा ज्वलति दण्डदीपे यदि गाढं मालिन्यं स्यात् तदा दीपालोकः आवृतो भवति, यदा च मालिन्यं परिष्कृतं भवति तदा दीपप्रकाशः ज्ञायते; तथैव सर्वदा प्रकाशमाने चैतन्ये अज्ञानावरणकारणात् तस्य प्रकाशो नैव ज्ञायते परन्तु अन्तःकरणवृत्त्या अज्ञानावरणस्य नाशे तु पुनः चैतन्यस्य प्रकाशः भवति। यदा च अज्ञानेन अनावृतं घटावच्छिन्नं चैतन्यं प्रकाशितं भवति तदा घटावच्छिन्नचैतन्ये विद्यमानः घटः अपि प्रकाशितो भवति। दृश्यते च लोके दीपः प्रकाशते चेत् तत्सन्निधौ विद्यमानानां द्रव्याणामपि प्रकाशो भवति। अतः घटाकारा अन्तःकरणवृत्तिः घटावच्छिन्नचैतन्यस्य आवरकम् घटविषयकम् अज्ञानं दूरीकरोति, तेन च घटावच्छिन्नं चैतन्यं प्रकाशते। तेन चैतन्येन विषयीकृतः घटः अपि प्रकाशमानघटावच्छिन्नचैतन्ये अध्यस्तत्वात् प्रकाशितो भवति। अतो ब्रह्मभिन्नो घटादिः चित्तवृत्तेः विषयो भवति, अज्ञाननाशेन अनावृतस्य चैतन्यस्यापि विषयो भवति। अनावृतं चैतन्यं शास्त्रेषु फलशब्देन कथ्यते। अतो घटादयः वृत्तिविषयाः फलविषयाः च भवन्ति। उच्यते च पञ्चदश्यां विद्यारण्याचार्येण –

"बुद्धितत्स्थचिदाभासौ द्वावेव व्याप्नुतो घटम्।

तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥" इति।

एवं जीवस्य स्वरूपं ब्रह्म अज्ञानेन आवृतं, तस्मादेव जीवाः स्वेषां नित्यशुद्धबुद्धमुक्तस्वरूपतां न जानन्ति। ब्रह्मविषयकस्य अज्ञानस्य नाशाय ब्रह्मविषयिणी चित्तवृत्तिः अपेक्षिता। सा च चित्तवृत्तिः निर्विकल्पकसमाधौ समुदेति। एषा एव चित्तवृत्तिः शास्त्रेषु अखण्डाकारचित्तवृत्तिः इत्युच्यते। ब्रह्म निरवयवम्, अवयवविशिष्टस्य अवयवानाम् उपचयापचयवशात् वृद्धिनाशौ स्तः। ब्रह्मणो नित्यत्वात् निरवयवत्वात् न हि वृद्धिनाशौ सम्भवतः। अतः ब्रह्म अखण्डम्। तस्मादेव ब्रह्माकारचित्तवृत्तिः अखण्डाकारचित्तवृत्तिः इत्यपि उच्यते। एवं निर्विकल्पकसमाधौ यदा ब्रह्माकारा चित्तवृत्तिरुदेति तदा ब्रह्मविषयकम् अज्ञानं नश्यति, स्वयंप्रकाशं ब्रह्म च आवरणनाशात् प्रकाशितं भवति। ब्रह्मणः प्रकाशार्थं तु अज्ञाननाशमात्रम् अपेक्षते, अतो ब्रह्म चित्तवृत्तेरेव विषयो भवति। ब्रह्मणः स्वप्रकाशत्वात् न हि ब्रह्म फलविषयो भवति। उच्यते च पञ्चदश्यां विद्यारण्याचार्येण -

"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्।" इति।

"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।" इति च।

एवं निर्विकल्पकसमाधौ अखण्डाकारचित्तवृत्तेरुदयात् ब्रह्मविषयकम् अज्ञानं नश्यति, अखण्डाकारचित्तवृत्तेरपि अज्ञानकार्यत्वात् तदपि विनश्यति। तदा जीवः नित्यशुद्धबुद्धमुक्तस्वभावं स्वरूपभूतं ब्रह्म एव भवति, यथा घटनाशे घटाकाशः महाकाश एव भवति तद्वत्।

पाठगतप्रश्नाः ४

२९. किंविधं चैतन्यम् अज्ञानं नाशयति?

३०. चित्तवृत्तिर्नाम का?

३१. चित्तस्य विषयाकारता नाम का?

३२. ब्रह्मभिन्नविषयाणां प्रकाशार्थं किमपेक्षितम्?

३३. ब्रह्मणः प्रकाशार्थं ब्रह्मणः फलविषयत्वमपेक्षितं न वा?

पाठसारः

"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिश्रुतिषु श्रवण-मनन-निदिध्यासनैः ब्रह्मसाक्षात्कार उपदिश्यते श्रुतिषु। श्रवणं हि सर्वेषाम् उपनिषदां ब्रह्मणि एव तात्पर्यम् इति अवधारणानुकूला मानसी क्रिया। मननं तावत् ब्रह्मविषये समापतितानां विरुद्धयुक्तीनां खण्डनानुकूला मानसी क्रिया। एवं श्रवणमननाभ्यां दृढनिश्चिते ब्रह्मणि तद्भिन्नविषयेभ्यः अपकृष्टस्य मनसः स्थैर्यमेव निदिध्यासनम्। निदिध्यासनेन अखण्डाकारचित्तवृत्तेः उदयात् ब्रह्मविषयकम् अज्ञानं नश्यति, जीवश्च स्वस्वरूपज्ञानात् मुच्यते।

निदिध्यासनम् एव समाधिः। निदिध्यासनस्य प्राथमिकी अवस्था तावत् सविकल्पकसमाधिः, परा काष्ठा तावत् निर्विकल्पकसमाधिः। सविकल्पकः समाधिर्हि योगदर्शनप्रोक्तः सम्प्रज्ञातसमाधिः, निर्विकल्पकसमाधिश्च योगदर्शनप्रोक्तः असम्प्रज्ञातः समाधिः। सविकल्पकसमाधिर्हि ज्ञातृज्ञानादिविकल्पसत्त्वेऽपि ब्रह्मणि तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्। सविकल्पकसमाधौ ज्ञातृ-ज्ञान-ज्ञेयरूपा त्रिपुटी तिष्ठति, ब्रह्माकारा अबाधितनिरवच्छिन्नचित्तवृत्तिश्च उदेति। निर्विकल्पकसमाधिः हि सर्वविकल्पलये सति ब्रह्मणि तदाकाराकारितायाः चित्तवृत्तेः एकीभावेन अवस्थानम्। निर्विकल्पकसमाधौ हि अखण्डब्रह्माकारा चित्तवृत्तिस्तिष्ठति, परन्तु तस्याः वृत्तेः अवभासो न भवति। योगदर्शनप्रोक्तात् असम्प्रज्ञातसमाधेः निर्विकल्पकसमाधेः अयमेव भेदो यत् असम्प्रज्ञातसमाधौ न हि चित्तवृत्तेः स्थितिः अङ्गीक्रियते, निर्विकल्पकसमाधौ चित्तवृत्तिः राजते एव।

घटादीनां प्रकाशः घटाकारान्तःकरणवृत्त्या घटविषयकाज्ञाननाशे सति सम्भवति। घटविषयकम् अज्ञानं घटावच्छिन्नचैतन्ये विद्यते। चक्षुषा घटसंयोगे सति अन्तःकरणेन सह घटस्य सम्बन्धवशात् घटाकारान्तःकरणवृत्तिः उदेति, सा च अन्तःकरणवृत्तिः घटावच्छिन्नचैतन्यस्यावरकम् अज्ञानं नाशयति। तेन च घटावच्छिन्नचैतन्यं प्रकाशते, प्रकाशमानं च चैतन्यं स्वस्मिन् अध्यस्तं घटमपि प्रकाशयति। अतो घटो यथा अन्तःकरणवृत्तेः विषयो भवति, तथा अनावृतस्य प्रकाशमानस्य चैतन्यस्यापि (फलस्यापि) विषयो भवति। अतो घटः वृत्तिविषयः फलविषयश्च भवति। स्वरूपभूतचैतन्ये ब्रह्मणि विद्यमानस्य अज्ञानस्य नाशाय अखण्डाकारचित्तवृत्तिः अपेक्षते, अज्ञाननाशे सति ब्रह्मणः प्रकाशः स्वत एव भवति, ब्रह्मणः स्वप्रकाशत्वात्। अतो ब्रह्म वृत्तिविषयो भवति, परन्तु फलविषयो न भवति।

निर्विकल्पकसमाधौ अखण्डाकारचित्तवृत्तेरुदये सति अज्ञानबन्धनाशात् जीवो मुच्यते। जीवस्तदा स्वरूपे प्रतिष्ठितो भवति। प्रारब्धकर्मणि विद्यमाने सति मुक्तोऽपि जीवः शरीरनाशपर्यन्तं शरीरे निर्लिप्ततया विद्यमानस्तिष्ठति, सा च अवस्था जीवन्मुक्तिः इत्युच्यते। प्रारब्धकर्मनाशे तु शरीरनाशात् विदेहमुक्तिः सम्भवति।

पाठान्तप्रश्नाः

१. निदिध्यासनमूर्च्छयोः को भेदः?
२. सविकल्पकसमाधेः निर्विकल्पकसमाधेश्च कथं निदिध्यासने अन्तर्भावः?
३. सम्प्रज्ञातपदस्य कोऽर्थः?
४. अखण्डाकारवृत्तेः उदये सति किं भवति?
५. का नाम जीवन्मुक्तिः?
६. कदा जीवस्य विदेहमुक्तिः भवति?
७. ब्रह्मणः वृत्तिविषयत्वं किमर्थम् अपेक्षितम्?
८. ब्रह्मणः सर्वव्यापकत्वद्योतकं भगवद्गीतावाक्यं किम्?
९. सविकल्पकः समाधिः कस्यां चित्तभूमौ जायते?
१०. निर्विकल्पकसमाधिः कस्यां चित्तभूमौ जायते?

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. मोक्ष एव परम पुरुषार्थः।
२. आत्यन्तिकदुःखनिवृत्तिः परमानन्दप्राप्तिश्च मोक्षः।
३. श्रवण-मनन-निदिध्यासनानि हि मोक्षोपायाः।
४. अखण्डाकारा चित्तवृत्तिः जीवस्य स्वस्वरूपविषयकम् अज्ञानं नाशयति।
५. अन्तःकरणमेव जीवोपाधिः।
६. "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति।
७. वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया।
८. शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजनकः मानसः व्यापारः मननम्।
९. निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकस्थैर्यानुकूलो मानसव्यापारः।
१०. चित्तवृत्तिः अज्ञानं नाशयति।
११. लौकिकज्ञानस्थले घटपटादिभिः सह तादात्म्येन ब्रह्म ज्ञातं भवति।

१२. यावन्न ब्रह्मज्ञानं भवति तावत् श्रवणादीनाम् आवृत्तिर्विधेया।

उत्तराणि- २

१३. ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।
निवातदीपवच्चितं समाधिरभिधीयते॥ इति।

१४. क्षिप्त-मूढ-विक्षिप्तावस्था हि चित्तस्य व्युत्थानावस्थाः।

१५. निरोधसंस्कारेण व्युत्थानसंस्कारस्य अभिभवो भवति।

१६. सम्प्रज्ञातसमाधिः इति।

१७. समाधिः द्विविधः सविकल्पकः समाधिः निर्विकल्पकः समाधिश्चेति।

उत्तराणि- ३

१८. व्युत्थाननिरोधसंस्कारयोः अभिभवप्रादुर्भावे सति चित्तस्य एकाग्रतापरिणामः समाधिः इति।

१९. ज्ञाता ज्ञानं ज्ञेयः इत्येतेषां त्रयाणां समाहार एव त्रिपुटी।

२०. सविकल्पकसमाधिः नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्।

२१. यथा सुवर्णकुण्डलादिज्ञाने सति तदुपादानस्य सुवर्णस्य ज्ञानं भवति, यथा वा मृन्मयगजादिज्ञाने सति तदुपादानभूताया मृत्तिकाया ज्ञानं भवति तथैव ज्ञातृ-ज्ञानादीनाम् ब्रह्मविवर्तत्वात् वाचारम्भणमात्रत्वात् ज्ञातृज्ञानादिभाने सति अपि अद्वैतं ब्रह्मवस्तु एव भासते।

२२. 'ऐतदात्म्यमिदं सर्वं', 'सर्वं खल्विदं ब्रह्म' इत्याद्याः।

२३. सर्वविकल्पलये सति ब्रह्माकारा चित्तवृत्तिः यदा भवति तदा निर्विकल्पकः समाधिः भवति।

२४. निर्विकल्पकः तु ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अतितराम् एकीभावेन अवस्थानम् इति।

२५. निर्विकल्पकसमाधौ चित्तवृत्तिस्तिष्ठति परन्तु तस्य अवभासो न भवति।

२६. असम्प्रज्ञातसमाधौ चित्तवृत्तयः तिरोभवन्ति, संस्कारमात्रम् अवशिष्यते। निर्विकल्पकसमाधौ तु न हि सर्वासां चित्तवृत्तीनां तिरोभावो भवति, अखण्डाकारा ब्रह्मविषयिणी चित्तवृत्तिरज्ञायमाना सती अवतिष्ठते इत्यनयोर्भेदः।

२७. निर्विकल्पकसमाधौ चित्तवृत्तिस्तिष्ठति परन्तु तस्य भानं न भवति, परन्तु सुषुप्तौ चित्तवृत्तिः न तिष्ठति चित्तवृत्तेश्च भानमपि न भवति इति भेदः।

२८. वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः।
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्॥ इति।

उत्तराणि- ४

२९. चित्तवृत्त्युपहितं चैतन्यमेव अज्ञानं नाशयति।

३०. चित्तस्य विषयाकारः परिणाम एव चित्तवृत्तिः।

३१. या अन्तःकरणवृत्तिः यद्विषयकम् अज्ञानं नाशयति सा अन्तःकरणवृत्तिः तद्विषयाकारा इति बोध्यम्।

३२. ब्रह्मभिन्नविषयाणां वृत्तिविषयत्वं फलविषयत्वं चापेक्षिते।

३३. ब्रह्मणः प्रकाशार्थं वृत्तिविषयत्वमात्रम् अपेक्षितम्। ब्रह्मणः स्वप्रकाशत्वात् फलविषयत्वं न सम्भवति।

॥ इति चतुर्विंशः पाठः ॥